परमोत्साहसन्तुष्टः पलिताकलितोऽप्यलम् ।
तपोधनैस्तन्निधनं शङ्कमानैर्निवारितः ॥
कारुण्यपूर्णहृदयैरन्यैरपि च सङ्गिभिः ।
ततोऽपि न तदुत्साहभङ्गोऽभूद्दृढचेतसः ॥
मध्ये मार्गं मृतस्यापि गुरोरिव गतिर्मम ।
इति निश्चितचेतस्के वशिष्ठे तापसे शुचौ ॥
अमृतांशुपरीपुष्टे तुष्टोऽहं चण्डिकेऽभवम् ।
स्वप्ने मया स संप्रोक्तो वशिष्ठस्तापसोत्तमः ।
दृढव्रत ! प्रसन्नोऽस्मि केदारं विद्धि मामिह ।
अभीष्टञ्च वरं मत्तः प्रार्थयस्वाविचारितम् ।
इत्युक्तवत्यपि मयि स्वप्नो मिथ्येति सोऽब्रवीत् ।
ततोऽपि स मया प्रोक्तः स्वप्नो मिथ्यास्तुचिश्नताम् ।
भवादृशाममिथ्यैव स्वाध्यायवशवर्त्तिनाम् ॥
वरं ब्रूहि प्रसन्नोऽस्मि स्वप्नशङ्कां त्यज द्विज ! ।
तव सत्ववतः किञ्चित् मयाऽदेयं न किञ्चन ॥
इत्युक्तं मे समाकर्ण्य वरयामास मामिति ।
शिष्यो हिरण्यगर्भस्य तपस्विजनसत्तमः ॥
यदि प्रसन्नो देवेश ! तदा मे सानुगा इमे ।
सर्व्वे शूलिन्ननुग्राह्या एष एव वरो मम ॥
देवि ! तस्येदमाकर्ण्य परोपकृतिशालिनः ।
वचनं नितरां प्रीतस्तथेति तमुवाच ह ॥
पुनः परोपकरणात् तत्तपोद्विगुणीकृतम् ।
तेन पुण्येन स मया पुनः प्रोक्तो वरं वृणु ॥
स वशिष्ठो महाप्राज्ञो दृढपाशुपतव्रतः ।
देवि ! मे प्रार्थयामास हिमशैलादिहस्थितिम् ॥
ततस्तत्तपसा तुष्टः कलामात्रेण तत्र हि ।
हिमशैले स्थितस्त्वात्र सर्व्वभावेन संस्थितः ॥
ततः प्रभाते संजाते सर्व्वेषां पश्यतामहम् ।
हिमाद्रेः प्रस्थितः प्राप्तः स्तूयमानः सुरर्षिभिः ॥
वशिष्ठं पुरतः कृत्वा सर्व्वसार्थसमायुतम् ।
हरपापह्रदे तीर्थे स्थितोऽहं तदनुग्रहात् ॥
मत्परिग्रहतः सर्व्वे हरपापे कृतोदकाः ।
आराध्य मामनेनैव वपुषा सिद्धिमागताः ॥
तदाप्रभृति लिङ्गेऽस्मिन् स्थितः साधकसिद्धये ।
अविमुक्ते परे क्षेत्रे कलिकाले विशेषतः ॥
तुषाराद्रिं समारुह्य केदारं वीक्ष्य यत् फलम् ।
तत् फलं सप्तगुणितं काश्यां केदारदर्शने ॥
गौरीकुण्डं यथा तत्र हंसतीर्थञ्च निर्म्मलम् ।
यथा मधस्रवा गङ्गा काश्यां तदखिलं तथा ॥
इदं तीर्थं हरपापं सप्तजन्माघनाशनम् ।
गङ्गायां मिलितं पश्चाज्जन्मकोटिकृताघहम्” ॥
केदाराख्यः पर्व्वतस्तु तीर्थयात्रिभिः प्रायेण वदर्य्याश्रमात् सप्तदिनैः समागमनीयः ॥ * ॥)

केदारकटुका, स्त्री, (केदारस्य क्षेत्रस्य कटुका इव ।) कटुका । इति राजनिर्घण्टः । कटकी इति भाषा ॥ (कटुकाशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

केदारजं, क्ली, (केदारात् जायते इति । जन् + डः ।) पद्मकाष्ठम् । इति राजनिर्घण्टः ॥

केदारेशः, पुं, (केदार एतन्नामा पर्व्वतः तत्र य ईशः लिङ्गरूपी महादेवः । यद्वा, केदाराख्यः ईशः ।) काशीस्थशिवविशेषः । यथा,—
“हरपापह्रदे स्नात्वा केदारेशं प्रपूज्य च ।
कोटिजन्मार्ज्जितैनोभिर्म्मुच्यते श्रद्धयान्वितः” ॥
इति स्कान्दे काशीखण्डे ७७ अध्यायः ॥

केदारेश्वरः, पुं, (केदाराख्य ईश्वरः । केदारपर्व्वतस्य ईश्वरो वा ।) काशीस्थशिवविशेषः । यथा,—
“शृणुष्वपर्णेऽभिधास्यामि केदारेश्वरसंकथाम् ।
समाकर्ण्यापि यां पापोऽप्यपापो जायते क्षणात्” ॥
इति स्कान्दे काशीखण्डे ७७ अध्यायः ॥

केनारः, पुं, (के मूर्द्ध्नि नारः । अलुक्समासः ।) कुम्भिनरकः । इति हेमचन्द्रः । शिरः । कपोलः । सन्धिः । इति मेदिनी ॥

केनिपातः, पुं, (के जले निपात्यतेऽसौ । नि + पत् + णिच् + अप् ।) अरित्रम् । इति शब्दरत्नावली । हालि इति भाषा ॥

केनिपातकः, पुं, (केनिपात + स्वार्थे कन् ।) केनिपातः । इत्यमरः । १ । १० । १३ ॥

केन्दुः, पुं, (कु ईषत् इन्दुरिव । कोः कादेशः ।) तिन्दुकवृक्षः । इति शब्दरत्नावली ॥

केन्दुकः, पुं, (केन्दु + संज्ञायां कन् ।) गालववृक्षः । इति शब्दचन्द्रिका ॥ गाव इति भाषा ॥ तालविशेषः । यथा । “लघुद्वयं विरामान्ततालि केन्दुकसंज्ञके” । लघुद्वयं स्थाने द्रुतद्वयमिति च पाठः । अपरं नियमं विना । इति सङ्गीतदामोदरः ॥

केन्द्रं, क्ली, लग्नम् । लग्नात् चतुर्थसप्तमदशमस्थानानि । तत्पर्य्यायः । कण्टकम् २ । यथा,—
“लग्नाम्बुद्यूनकर्म्माणि केन्द्रमुक्तञ्च कण्टकम् ।
चतुष्टयञ्चात्र खेटो बली लग्ने विशेषतः” ॥
इति नीलकण्ठकृतवर्षतन्त्राख्यजातकम् ॥ स्पष्टग्रहानयनार्थं शीघ्रमन्दसंज्ञकाङ्कद्वयम् । यथा,—
“मृदूच्चेन हीनो ग्रहो मन्दकेन्द्रं
चलोच्चं ग्रहाणां भवेच्छीघ्रकेन्द्रम्” ॥
इति भास्करीयसिद्धान्तशिरोमणौ स्पष्टाधिकारः ॥ ग्रहं संशोध्य मन्दोच्चात् तथा शीघ्रात् विशोध्य च शिष्टं केन्द्रम् । इति सूर्य्यसिद्धान्तः ॥ गोलस्य मध्यस्थानम् । यथा,—
“वृत्तस्य मध्यं किल केन्द्रमुक्तम्
केन्द्रं ग्रहोच्चान्तरमुच्यतेऽतः ।
यतोऽन्तरे तावति तुङ्गदेशा-
न्नीचोच्चवृत्तस्य सदैव केन्द्रम्” ॥
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥ (यात्रायोगविशेषः । यथा, शब्दार्थचिन्तामणिधृतवचने ।
“आपोक्लिमगते चन्द्रे केन्द्रस्थे सुरपूजिते ।
योगः केन्द्र इति ख्यातो यातुरिष्टार्थसिद्धिदः” ॥
प्रान्तसीमा । यथा, योगशास्त्रे ।
“पृथिव्या उभयोः केन्द्रयोः स्थितौ द्वावेव योगिनौ । एकत्र सान्निध्यस्थितिवत् सन्निकर्षस्थिताविव वा अन्योन्यमालपति” ॥)

केप, ऋ ङ गत्याम् । चाले । इति कविकल्पद्रुमः । (भ्वां-आत्मं-सकं-सेट्-ऋदित् ।) ङ, केपते । ऋ, अचिकेपत् । इति दुर्गादासः ॥

केमद्रुमः, पुं, जन्मकालीनग्रहयोगविशेषः । यथा ।
“रविवर्ज्जं द्वादशगैरनफा चन्द्रात् द्वितीयगैः सुनफा ।
उभयस्थितैर्दुरधुरा केमद्रुमसंज्ञितोऽन्यः” ॥
अनफादियोगः । सच्छीलं विषयसुखान्वितं प्रभुख्यातियुक्तमनफायाम् । सुनफायां धीधनकीर्त्तियुक्तमात्मार्ज्जितैश्वर्य्यञ्च ॥ बहुभृत्यकुटुम्बारम्भमुद्विग्नचित्तमपि दौरधुरे । भृतकं दुःखिनमधनं जातं केमद्रुमे विद्यात् ॥ अनफादिफलम् । इति ज्योतिस्तत्त्वम् ॥ (केमद्रुमयोगे जातस्य फलं यथा, जातकपद्धतौ ।
“नृपतेर्वंशजातोऽपि केमद्रुमभवो नरः ।
मलिनो दुःखितो नीचो निःस्वो दासो भवेत्खलः” ॥
तद्भङ्गस्तु तत्रैव । “चन्द्रे केन्द्रगतेऽथवा ग्रहयुते सर्व्वैश्च दृष्टे विधौ सर्व्वैः कण्टकसंश्रितैर्ग्रहयुतैः केमद्रुमो नेष्यते । लग्नाद् विधो र्वा वृद्धिस्थैः शुभैः सर्व्वं शुभं फलं । द्वाभ्यां मध्यं तथैकेनाल्पं चेन्नास्ति दरिद्रता” ॥)

केमुकः, पुं, (के शिरोवच्छेदे अमयतीति । अम् रोगे + उक प्रत्ययः ।) वृक्षविशेषः । कौँउ इति भाषा । तत्पर्य्यायः । पेचुकः २ पेचुनी ३ पेचुः ४ पेचिका ५ दलसारिणी ६ केचुकः ७ । इति रत्नमाला ॥ तस्य मूलगुणाः । कफपित्तनाशित्वम् । रोचनत्वम् । अग्निदीपनत्वञ्च । इति राजवल्लभः ॥ कटुत्वम् । पाके तिक्तत्वम् । ग्राहित्वम् । हिमत्वम् । लघुत्वम् । पाचनत्वम् । हृद्यत्वम् । ज्वरकुष्ठकासप्रमेहास्रनाशित्वम् । वातलत्वम् । पटुत्वञ्च । इति भावप्रकाशः ॥ (एतत् फलं हविष्ये वर्ज्जनीयम् । स्त्री, कन्दशाकविशेषः ॥)

केयूरं, क्ली, (के बाहुशिरसि भूषणतां याति । या गत्यां + ऊरः । अलुक् समासः ।) अलङ्कारविशेषः । ताड़ इति भाषा । तत्पर्य्यायः । अङ्गदम् २ । इत्यमरः । २ । ६ । १०७ ॥ (यथा, महाभारते । ६ । ६७ । २१ ।
“पादानां भूषणानाञ्च केयूराणाञ्च सर्व्वशः ।
राशयस्त्वात्र दृश्यन्ते भीष्मभीमसमागमे” ॥)

केयूरः, पुं, रतिबन्धविशेषः । यथा,—
“स्त्रीजङ्घे चैव संपीड्य दोर्भ्यामालिङ्ग्य सुन्दरीम् ।
कारयेत् स्थापनं कामी बन्धः केयूरसंज्ञकः” ॥
इति स्मरदीपिका ॥ अपि च ।
“स्त्रीणां जङ्घान्तराविष्टो गाढ़मालिङ्ग्य सुन्दरीम् ।
कामयेद्विपुलं कामी बन्धः केयूरसंज्ञकः” ॥
इति रतिमञ्जरी ॥

केरलः, पुं, देशभेदः । मालेयोयार इति भाषा । यथा । उग्राः केरलपर्य्यायाः । इति हेमचन्द्रः ॥ वेदयागानधिकारिश्मश्रुधारिम्लेच्छविशेषः । पुरैते क्षत्रिया आसन् सगरेणैषां धर्म्मो नाशित वेशान्यत्वञ्च कृतम् । यथा,—
“निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना ।
शका यवनकाम्बोजाः पारदाः पह्लवास्तथा ॥
कोलिसर्पा माहिषका दर्व्वाश्चोलाः सकेरलाः ।
सर्व्वे ते क्षत्रियास्तात ! धर्म्मस्तेषां निराकृतः” ॥
इति हरिवंशः । (तथा च रघुवंशे । ४ । ५४ ।
“भयोत्सृष्टविभूषाणां तेन केरलयोषिताम् ।
अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः” ॥)

केरली, स्त्री, (केरल + गौरादित्वात् ङीष् ।)